# संस्कृत वार्ता:

दिनाङ्क : 13/04/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी एकविंशति-शताब्द्याः भारतस्य महिला-सशक्तीकरणाभियानस्य कृते जनसमर्थनस्य समाह्वानम् अकरोत् , नवदिल्ल्यां च नारीशक्तिवन्दनसम्मेलनं संसदः विशिष्टसत्रावधौ समबोधयत् ।
- पश्चिमबंगाल-तमिलनाडु-राज्ययोः विधानसभानिर्वाचनाय प्रचाराभियानं द्रुतगत्या प्रवर्तते । विभिन्नदलानां शीर्षनेतारः मतदातृन् वशीकर्तुं जनसभां कुर्वन्तः सन्ति ।
- सर्वकारेण 'प्रधानमंत्री इलेक्ट्रिक ड्राइव रिवोल्यूशन इन इनोवेटिव व्हीकल एनहांसमेंट' (PM E-DRIVE) इत्यस्याः योजनायाः अन्तर्गतं इलेक्ट्रिक-त्रिचक्रिका-वाहनेभ्यः समर्थनराशिः अष्टाविंशत्यधिक-द्विसहस्रतमाब्दस्य मार्चमासं यावत् वर्षद्वयाय वर्धिता अस्ति ।
- आईपीएल क्रिकेट-स्पर्धामालिकायां अद्य सनराइज़र्स-हैदराबाद-दलं राजस्थान-रॉयल्स-दलेन सह स्पर्धिष्यति । स्पर्धेयं तावत् हैदराबाद-नगरस्य राजीवगान्धी-अन्ताराष्ट्रिय-क्रीडाङ्गणे सायं सार्ध-सप्तवादनात् प्रारप्स्यते।

-----------------------------------------

<u>प्रधानमन्त्री-नारीशक्तिसम्मेलनम्</u>

प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् भारतस्य नारी-शक्तिः स्वकीयेन दृढ-साहसेन, आत्मविश्वासेन, परिश्रमेण च अनवरतं नूतनान् उत्कर्षान् अवाप्नोति। नवदिल्ल्यां अद्य नारी-शक्ति-वन्दन-सम्मेलनं सम्बोधयन् श्रीमोदी प्रोक्तवान् यत् एकविंशति-शताब्द्यां भारतं महिला-सशक्तीकरणाय समर्पितं कञ्चन ऐतिहासिकं निर्णयं स्वीकर्तुं सज्जं वर्तते ।

तेन प्रतिपादितं यत् संसद् नूतनम् इतिहासम् रचयितुं समेधते , येन अतीतस्य भविष्यस्य च आकाङ्क्षाः पूरिताः भविष्यन्ति। प्रधानमन्त्रिणा सबलं प्रोदीरितं यत् लोकतन्त्रे महिलारक्षणम् अतीव आवश्यकं वर्तते। तेन स्पष्टीकृतं यत् महिलानां सहभागिता लोकतन्त्रं सुदृढीकरोति।

श्रीमोदी अवदत् यत् पञ्चायती-राज-संस्थाः महिला-नेतृत्वस्य उत्कृष्टम् उदाहरणं वर्तन्ते। साम्प्रतं चतुर्दश-लक्षाधिकाः महिलाः स्थानीय-सार्वजनिक-निकायेषु सेवारताः सन्ति ।

अत्रावसरे महिला-बाल-विकास-मन्त्री अन्नपूर्णा देवी प्रावोचत् यत् नारी-शक्ति-वन्दनाधिनियमः महिलानां आत्मसम्मानं लोकतान्त्रिक-सहभागितां च सुनिश्चिनोति । दिल्ल्याः मुख्यमन्त्री रेखा गुप्ता अपि प्रधानमन्त्रिणः प्रशंसां कुर्वती प्रोक्तवती यत् कोटिशः जन-धन-लेखानां माध्यमेन महिलाः मुख्यधारायां सम्मिलिताः भवन्ति।

-------------------------------------------

<u>पश्चिमबङ्गालः-प्रचाराभियानम्</u>

पश्चिमबंगाल-तमिलनाडु-राज्ययोः विधानसभानिर्वाचनाय प्रचाराभियानं द्रुतगत्या अग्रे प्रवर्तते । विभिन्नदलानां शीर्षनेतारः मतदातॄन् वशीकर्तुं जनसभां कुर्वन्तः सन्ति । भाजपेति दलस्य वरिष्ठनेता केंद्रीयगृह-मन्त्री च अमितशाहः बीरभूम-जनपदे दलप्रत्याशिनां समर्थनाय एकां जनसभां समबोधयत् ।तेन तृणमूल-कांग्रेसेति दलस्य कुशासनं विरुध्य आलोचना कृता । अपरत्र तृणमूल-कांग्रेसदलस्य प्रमुखा मुख्यमन्त्री च ममताबनर्जी इत्येषा एकस्यां जनसभायां भाजपादलं विरुध्यः आरोपं प्रख्यापितवती यत् नागरिकता-संशोधनाधिनियमः इत्यस्य अनन्तरं भाजपादलं एनआरसी इत्यस्यापि क्रियान्वयनं कर्तुं प्रयतते ।

-------------------------------------------

<u>निर्वाचनायोगः</u>

वरिष्ठोपनिर्वाचनायुक्तौ, ज्ञानेशभारती पवन-कुमार-शर्मा च अद्य पश्चिम-बङ्गालस्य यात्रां कुरुतः येन आगामि-विधानसभानिर्वाचनानां सज्जतायाः समीक्षा भवेत् । स्वकीये त्रिदिवसीय-

यात्रावधौ , ज्ञानेश-भारती पश्चिमबर्धमाने, पूर्वबर्धमाने, हुगलीजनपदे, उत्तर-24 परगना इति जनपदे च जनपदनिर्वाचनाधिकारिभिः , आरक्ष्यायुक्तैः, आरक्ष्याधीक्षकैः, पर्यवेक्षकैः च सह मेलनं सम्वादं च विधास्यति ।

------------------------------------------

## अंतर-मन्त्रालय-वक्तव्यम्

सर्वकारः गृहोपभोक्तृभ्यः LPG इत्यस्य शतप्रतिशन्मितापूर्तिं सुनिश्चितं करोति सहैव देशे कस्यापि वितरकस्य पार्श्वे LPG इत्यस्य अनुपलब्धतायाः कापि सूचना न प्राप्ता । अद्य अपराह्ने नवदिल्ल्यां सम्बोधयन्ती, जीवाश्मतैल-प्राकृतिक-वात्येधन-मंत्रालयस्य संयुक्तसचिवा सुजाताशर्मा इत्येषा प्रोक्तवती यत् सम्पूर्णे देशे LPG इत्यस्य आपूर्तिः सामान्या वर्तते । सा अकथयत् यत् LPG इत्यस्य वाणिज्यिकापूर्तिः सप्तति-प्रतिशन्मितं यावत् सुनिश्चिता । अपरत्र गरिष्ठोद्योग-मंत्रालयस्य अतिरिक्तसचिवः डॉ. हनीफकुरैशी इत्येषः अकथयत् यत् सर्वकारेण **'प्रधानमंत्री इलेक्ट्रिक ड्राइव रिवोल्यूशन इन इनोवेटिव व्हीकल एनहांसमेंट'** (PM E-DRIVE) इत्यस्याः योजनायाः अन्तर्गतं इलेक्ट्रिक-त्रिचक्रिका-वाहनेभ्यः समर्थनराशिः अष्टाविंशत्यधिक-द्विसहस्रतमाब्दस्य मार्चमासं यावत् वर्षद्वयाय वर्धिता अस्ति ।

------------------------------------------

## गुजरात-दुर्घटना

गुजरातस्य, सुरेंद्रनगर-जनपदस्य छराडेति ग्रामं निकषा लखतर-विरामगाम-राजमार्गे अद्य प्रातः एकस्यां मार्गदुर्घटनायां सप्ततीर्थयात्रिणः मारिताः अन्ये च व्रणिताः अभवन् । एषा घटना तदा अभवत् यदा एकेन ट्रकयानेन श्रद्धालुनाम् एकस्य समूहस्य मर्दनं कृतम्, ये राजकोटतः बहुचराजीं यावत् पदातिरेव यात्रां कुर्वन्तः सन्ति । सर्वेऽपि मृतकाः राजकोटक्षेत्रस्य निवासिनः आसन्। राष्ट्रपतिना द्रौपदीमुर्मूवर्यया प्रधानमन्त्रिणा नरेन्द्रमोदिना च गुजरातस्य

सुरेंद्रनगरजनपदे विहितायाम् अस्यां दुर्घटनायां जातां जनहानिं प्रति गभीरं शोकं व्यक्तीकृतम् सहैव एकस्मिन् सार्वजनिकसञ्जालीयसंदेशे द्वाभ्यामेव व्रणितानां शीघ्रस्वास्थ्यलाभाय प्रार्थना कृता ।

-------------------------------------------

<u>जलियांवाला-बागकाण्डः</u>

राष्ट्रपतिपदासीना द्रौपदी मुर्मूः प्रधानमन्त्री नरेन्द्रमोदी च अद्य एकोनविंशत्यधिक-ऊनविंशतिशततमे वर्षे अस्मिन्नेव दिने जलियाँवाला-बागकाण्डे हुतङ्गतेभ्यः स्वतन्त्रता-सेनानिभ्यः श्रद्धाञ्जलिं अर्पितवन्तौ । राष्ट्रपतिः मुर्मूः सामाजिक-सञ्जालीय-माध्यमे स्वसन्देशे समुल्लिखितवती यत् अनया घटनया स्वतन्त्रतायै देशवासिषु नूतना चेतना दृढ-सङ्कल्पश्च समुद्भूतः । सा प्रोक्तवती यत् राष्ट्रं तेभ्यः सर्वदापि कार्तज्ञं प्रकटिष्यति । स्वसन्देशे प्रधानमन्त्री नरेन्द्रमोदी प्रतिपादितवान् यत् तेषां बलिदानं देशवासिनां अपूर्व-साहसस्य प्रतीकं वर्तते। श्रीमोदिना विशेषतः उल्लेखितं यत् तेषां धैर्यं तथा च अविचल-सङ्कल्पः आगामि-वंशं स्वतन्त्रतायाः, न्यायस्य,च मूल्यानां रक्षणाय निरन्तरं प्रेरयिष्यति।

-------------------------------------------

<u>राष्ट्रपति-यात्रा</u>

राष्ट्रपतिपदासीना द्रौपदी मुर्मूः अद्य गुजरात-राज्यस्य राजकोट-नगरे अखिल-भारतीय-आयुर्विज्ञान-संस्थानस्य प्रथमं दीक्षान्त-समारोहं सम्बोधयिष्यति। अवसरेऽस्मिन् संस्थानस्य प्रथम-समूहस्य प्रायः पञ्चाशत् छात्रेभ्यः उपाधयः प्रदास्यन्ते। कार्यक्रमेऽस्मिन् गुजरात-राज्यस्य राज्यपालः आचार्य-देवव्रतः तथा च केन्द्रीय-स्वास्थ्य-राज्यमन्त्री अनुप्रिया पटेलः इत्येतौ उपस्थितौ भविष्यतः । श्वः राष्ट्रपतिः गान्धीनगरस्य लोकभवने डॉ. बी.आर. अम्बेडकर-महोदयस्य जन्म-जयन्तीमालक्ष्य आयोजिते सामाजिक-समरसता-महोत्सवे भागं ग्रहीष्यति।

-------------------------------------------

<u>क्रिकेट-क्रीडा</u>

आईपीएल क्रिकेट-स्पर्धामालिकायां अद्य सनराइज़र्स-हैदराबाद-दलं राजस्थान-रॉयल्स-दलेन सह स्पर्धिष्यति । स्पर्धेयं तावत् हैदराबाद-नगरस्य राजीवगान्धी-अन्ताराष्ट्रिय-क्रीडाङ्गणे सायं सार्ध-सप्तवादनात् प्रारप्स्यते।

।। इति वार्ता: ।।